# shrIviShNupanjarastotram

# શ્રીવિષ્ણુપઞ્જરસ્તોત્રમ્

## Document Information

Text title : viShNupanjarastotram

File name : viShNupanjarastotrambrahmANDapurANa.itx

Category : vishhnu, panjara, vishnu

Location : doc_vishhnu

Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com

Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com, NA, PSA Easwaran

Description-comments : brahANDapurANa

Latest update : April 29, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીવિષ્ણુપઞ્જરસ્તોત્રમ્

શ્રીગણેશાય નમઃ ।
ૐ અસ્ય શ્રીવિષ્ણુપઞ્જરસ્તોત્રમન્ત્રસ્ય નારદ ઋષિઃ । અનુષ્ટુપ્ છન્દઃ ।
શ્રીવિષ્ણુઃ પરમાત્મા દેવતા । અહં બીજમ્ । સોહં શક્તિઃ । ૐ હ્રીં કીલકમ્ ।
મમ સર્વદેહરક્ષણાર્થં જપે વિનિયોગઃ ।
નારદ ઋષયે નમઃ મુખે । શ્રીવિષ્ણુપરમાત્મદેવતાયૈ નમઃ હૃદયે ।
અહં બીજં ગુહ્યે । સોહં શક્તિઃ પાદયોઃ । ૐ હ્રીં કીલકં પાદાગ્રે ।
ૐ હ્રાંહ્રીંહ્રૂંહ્રૈંહ્રૌંહ્રઃ ઇતિ મન્ત્રઃ ।
ૐ હ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ । ૐ હ્રીં તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં મધ્યમાભ્યાં નમઃ । ૐ હ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં કનિષ્ઠિકાભ્યાં નમઃ । ૐ હ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
ઇતિ કરન્યાસઃ ।
અથ હૃદયાદિન્યાસઃ । ૐ હ્રાં હૃદયાય નમઃ । ૐ હ્રીં શિરસે સ્વાહા ।
ૐ હ્રૂં શિખાયૈ વષટ્ । ૐ હ્રૈં કવચાય હુમ્ ।
ૐ હ્રૌં નેત્રત્રયાય વૌષટ્ । ૐ હ્રઃ અસ્ત્રાય ફટ્ । ઇતિ અઙ્ગન્યાસઃ ।
અહંબીજપ્રાણાયામં મન્ત્રત્રયેણ કુર્યાત્ ।

અથ ધ્યાનમ્ ।

પરં પરસ્માત્પ્રકૃતેરનાદિમેકં નિવિષ્ટં બહુધા ગુહાયામ્ ।
સર્વાલયં સર્વચરાચરસ્થં નમામિ વિષ્ણું જગદેકનાથમ્ ॥ ૧॥

ૐ વિષ્ણુપઞ્જરકં દિવ્યં સર્વદુષ્ટનિવારણમ્ ।
ઉગ્રતેજો મહાવીર્યં સર્વશત્રુનિકૃન્તનમ્ ॥ ૨॥

ત્રિપુરં દહમાનસ્ય હરસ્ય બ્રહ્મણોદિતમ્ ।
તદહં સમ્પ્રવક્ષ્યામિ આત્મરક્ષાકરં નૃણામ્ ॥ ૩॥

પાદૌ રક્ષતુ ગોવિન્દો જઙ્ઘે ચૈવ ત્રિવિક્રમઃ ।
ઊરૂ મે કેશવઃ પાતુ કટિં ચૈવ જનાર્દનઃ ॥ ૪॥

નાભિં ચૈવાચ્યુતઃ પાતુ ગુહ્યં ચૈવ તુ વામનઃ ।
ઉદરં પદ્મનાભશ્ચ પૃષ્ઠં ચૈવ તુ માધવઃ ॥ ૫॥

વામપાર્શ્વં તથા વિષ્ણુર્દક્ષિણં મધુસૂદનઃ ।
બાહૂ વૈ વાસુદેવશ્ચ હૃદિ દામોદરસ્તથા ॥ ૬॥

કણ્ઠં રક્ષતુ વારાહઃ કૃષ્ણશ્ચ મુખમણ્ડલમ્ ।
માધવઃ કર્ણમૂલે તુ હૃષીકેશશ્ચ નાસિકે ॥ ૭॥

નેત્રે નારાયણો રક્ષેલ્લલાટં ગરુડધ્વજઃ ।
કપોલૌ કેશવો રક્ષેદ્વૈકુણ્ઠઃ સર્વતોદિશમ્ ॥ ૮॥

શ્રીવત્સાઙ્કશ્ચ સર્વેષામઙ્ગાનાં રક્ષકો ભવેત્ ।
પૂર્વસ્યાં પુણ્ડરીકાક્ષ આગ્નેય્યાં શ્રીધરસ્તથા ॥ ૯॥

દક્ષિણે નારસિંહશ્ચ નૈરૃત્યાં માધવોઽવતુ ।
પુરુષોત્તમો મે વારુણ્યાં વાયવ્યાં ચ જનાર્દનઃ ॥ ૧૦॥

ગદાધરસ્તુ કૌબેર્યામીશાન્યાં પાતુ કેશવઃ ।
આકાશે ચ ગદા પાતુ પાતાલે ચ સુદર્શનમ્ ॥ ૧૧॥

સન્નદ્ધઃ સર્વગાત્રેષુ પ્રવિષ્ટો વિષ્ણુપઞ્જરઃ ।
વિષ્ણુપઞ્જરવિષ્ટોઽહં વિચરામિ મહીતલે ॥ ૧૨॥

રાજદ્વારેઽપથે ઘોરે સઙ્ગ્રામે શત્રુસઙ્કટે ।
નદીષુ ચ રણે ચૈવ ચોરવ્યાઘ્રભયેષુ ચ ॥ ૧૩॥

ડાકિનીપ્રેતભૂતેષુ ભયં તસ્ય ન જાયતે ।
રક્ષ રક્ષ મહાદેવ રક્ષ રક્ષ જનેશ્વર ॥ ૧૪॥

રક્ષન્તુ દેવતાઃ સર્વા બ્રહ્મવિષ્ણુમહેશ્વરાઃ ।
જલે રક્ષતુ વારાહઃ સ્થલે રક્ષતુ વામનઃ ॥ ૧૫॥

અટવ્યાં નારસિંહશ્ચ સર્વતઃ પાતુ કેશવઃ ॥

દિવા રક્ષતુ માં સૂર્યો રાત્રૌ રક્ષતુ ચન્દ્રમાઃ ॥ ૧૬॥

પન્થાનં દુર્ગમં રક્ષેત્સર્વમેવ જનાર્દનઃ ।
રોગવિઘ્નહતશ્ચૈવ બ્રહ્મહા ગુરુતલ્પગઃ ॥ ૧૭॥

સ્ત્રીહન્તા બાલઘાતી ચ સુરાપો વૃષલીપતિઃ ।

મુચ્યતે સર્વપાપેભ્યો યઃ પઠેન્નાત્ર સંશયઃ ॥ ૧૮॥

અપુત્રો લભતે પુત્રં ધનાર્થી લભતે ધનમ્ ।
વિદ્યાર્થી લભતે વિદ્યાં મોક્ષાર્થી લભતે ગતિમ્ ॥ ૧૯॥

આપદો હરતે નિત્યં વિષ્ણુસ્તોત્રાર્થસમ્પદા ।
યસ્ત્વિદં પઠતે સ્તોત્રં વિષ્ણુપઞ્જરમુત્તમમ્ ॥ ૨૦॥

મુચ્યતે સર્વપાપેભ્યો વિષ્ણુલોકં સ ગચ્છતિ ।
ગોસહસ્રફલં તસ્ય વાજપેયશતસ્ય ચ ॥ ૨૧॥

અશ્વમેધસહસ્રસ્ય ફલં પ્રાપ્નોતિ માનવઃ ।
સર્વકામં લભેદસ્ય પઠનાન્નાત્ર સંશયઃ ॥ ૨૨॥

જલે વિષ્ણુઃ સ્થલે વિષ્ણુર્વિષ્ણુઃ પર્વતમસ્તકે ।
જ્વાલામાલાકુલે વિષ્ણુઃ સર્વં વિષ્ણુમયં જગત્ ॥ ૨૩॥

ઇતિ શ્રીબ્રહ્માણ્ડપુરાણે ઇન્દ્રનારદસંવાદે શ્રીવિષ્ણુપઞ્જરસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com, NA, PSA Easwaran

*shrIviShNupanjarastotram*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*